दूरेपाकुः फलेपाकुः इति। तेषाम् उप्रत्ययः निपातनादेव। तक्रम् वक्रम् इति तञ्चतेर्वञ्चतेश्च स्फायितञ्चिवञ्चि (उ. १७८) इत्यादिना सूत्रेण रक्। व्यतिषङ्गः – व्यतिषजति इति पचाद्यच् (३.१.१३४/२८९६)। [1]अनुषङ्गः। [2]अवसर्गः। उपसर्गः[3]। श्वपाकः, मांसपाकः, कपोतपाकः,[4] उलूकपाकः इति कर्मोपपदादण् (३.२.१/२९१३) प्रत्ययः। सञ्ज्ञायाम् – मेघः। अवदाघः। निदाघः। अर्हतेर्घञ्, अर्घः। अवपूर्वस्य निपूर्वस्य च दहेरवदाघः, निदाघः। सञ्ज्ञाया अन्यत्र अर्हः, अवदाहः, निदाहः। न्यग्रोधः, वीरुद् इत्यत्र न्यक्पूर्वस्य रुहेः पचाद्यचि, विपूर्वस्य [5]क्विपि धकारो विधीयते। [6]न्यग्रोहयति न्यग्रोधः। विरोहयति इति वीरुत्॥

## हो हन्तेर्ञ्णिन्नेषु। (५४/३५८)

हन्तेः हकारस्य कवर्गादेशो भवति ञिति णिति [7]प्रत्यये परतः नकारे च[8]। घातयति। घातकः। साधुघाती। घातंघातम्। घातो वर्तते। नकारे – घ्नन्ति। घ्नन्तु। अघ्नन्। हः इति किम्? अलोऽन्त्यस्य मा भूत्। हन्तेः इति किम्? प्रहारः। प्रहारकः। ञ्णित्प्रत्ययो हन्तेर्विशेषणम्, नकारो हकारस्य, नकारेऽनन्तरस्य हन्तिहकारस्य इति। तच्चानन्तर्यं [9]श्रुतिकृतं सन्निपातकृतमाश्रीयते। [10]स्थानिवद्भावशास्त्रकृतं तु यदनानन्तर्यं तदविघातकम्, वचनसामर्थ्यात्। यद्यपि सर्वैरेव ञ्णिन्नैर्हन्तिहकारो विशिष्यते तथापि 'येन नाव्यवधानं तेन व्यवहितेऽपि वचनप्रामाण्यात्' (व्या. प. ४६) इति ञ्णिति [11]धात्ववयवेन व्यवहितेऽपि सति भवति। इह तु न भवति, हननमिच्छति हननीयति, [12]हननीयतेर्ण्वुल् हननीयकः इति॥

## अभ्यासाच्च। (५५/२४३०)

अभ्यासादुत्तरस्य हन्तिहकारस्य कवर्गादेशो भवति। जिघांसति। जङ्घन्यते। [13]अहं जघन। अभ्यासनिमित्ते प्रत्यये हन्तेरङ्गस्य योऽभ्यासः तस्मादेवैतत् कुत्वम्। [14]इह न भवति, हननीयितुम् इच्छति जिहननीयिषति॥

## हेरचङि। (५६/२५३१)

हिनोतेर्हकारस्य अभ्यासादुत्तरस्य कवर्गादेशो भवति [15]अचङि। प्रजिघीषति। प्रजेघीयते। प्रजिघाय। अचङि इति किम्? प्राजीहयत् [16]दूतम्। अचङि इति शक्यमकर्तुम्। कथम्? चङ्यभ्यासनिमित्ते णौ हिनोतिरङ्गं भवति, तत्राभ्यासनिमित्ते प्रत्यये हेरङ्गस्य इति विज्ञायमाने प्राप्तिरेव नास्ति? तत् क्रियते ज्ञापकार्थम्। एतत् [17]ज्ञाप्यते, हेरचङि इति चङोऽन्यत्र हेर्ण्यधिकस्यापि कुत्वं भवति इति। तेन प्रजिघाययिषति इति सिद्धं भवति॥

## सन्लिटोर्जेः। (५७/२३३१)

सनि लिटि च प्रत्यये[18] जेः अङ्गस्य योऽभ्यासः तस्मादुत्तरस्य कवर्गादेशो भवति। जिगीषति। जिगाय। सन्लिटोः इति किम्? जेजीयते। जिनातेः [19]सम्प्रसारणे कृते यद्यपि जिर्भवति, तथापि लाक्षणिकत्वात् तस्य ग्रहणं न भवति, जिज्यतुः, जिज्युः [20]इत्येव भवति॥

---

1. अनुषङ्गः नास्ति क. 2. सृजति इति सर्गः अवसृजति इति अवसर्गः क.इ. 3. मेघः इत्यधिकम् अ. ह.ड. 4. पिण्डपाकः इत्यधिकम् ह. 5. हकारस्य इत्यधिकम् क. 6. न्यग्रोहति क. 7. प्रत्यये नास्ति क. 8. परतः इत्यधिकम् क. 9. श्रुतिकृतं नास्ति ड. 10. स्थानिवद्भावकृते क, स्थानिवद्भावात् इ. 11. इत्यवयवेन क. 12. एतन्नास्ति क. 13. अहं किल जघान ड, जघान ह. 14. इह नास्ति क. 15. चङं वर्जयित्वा ड.क.इ, अचङि प्रत्यये ब. 16. दूतम् नास्ति क.इ. 17. ज्ञापयति क. 18. परतः इत्यधिकम् इ. 19. लिटि किति इत्यधिकम् इ. 20. इति च क.